दिनाङ्क :- 09.05.2025

प्रात: - 06:55

## पाकिस्तानम्-प्रक्षेपास्त्राक्रमणम्

पाकिस्तानदेशेन अष्ट प्रक्षेपास्त्राणि जम्मू-कश्मीर- राज्यस्य सतवारी-साम्बा-आर.एस्.पुरा-अरनिया-क्षेत्रेषु प्रक्षेपितानि। रक्षासूत्रानुसारि सर्वाण्यपि प्रक्षेपास्त्राणि वायु-रक्षाबलै: विनष्टीकृतानि अवरूद्धानि च । प्राप्तसूचनानुसारं जम्मूनगरस्य दृश्यम् इजराइलदेशोपरि जातस्य हमासे आक्रमणस्य समानमेवासीत्। पाकिस्तानदेशीयं सैन्यबलम् आतङ्की-सङ्घटनम् हमासस्य सादृशं कार्यं कुर्वदस्ति अपि च व्यवहारं साधयति। सूत्रै: विज्ञापितं यत् पाकिस्तानदेशस्य आई.एस.आई. इति तथा च हमास इति आतङ्कीसङ्घटनम् विगतमासे पाकिस्तानाधिकृतक्षेत्रे मिलितवती। अन्ताराष्ट्रियसीम्न: जम्मू-पठानकोट-उधमपुर-क्षेत्राणां सैन्यस्थानकानि पाकिस्तानदेशेन प्रक्षेपास्त्राणि ड्रोनयन्त्राणि च उपयुज्य लक्ष्यीकृतानि। तावत् कापि हानि: नैव समङ्किता। अयं सङ्कट: भारतीयसशस्त्रबलै: गतिजागतिसाधनै: सह एस्.ओ.पी. इत्यनुसारं निष्प्रभाव: कृत। रक्षासूचनया प्रतिपादितं यत् पश्चिमीय सीम्नि अनेकेषु स्थानेषु ड्रोन इत्योपकरणानि दरीदृष्टानि तत्रैव भारतीयवायुरक्षाप्रणाल्या प्रभावि-विधिना सह अस्य सङ्कटस्य सामुख्यं जातम्। अत्रान्तरे गतरात्रौ प्राय: एकादशवादने सीमासुरक्षाबलेन जम्मू-कश्मीरस्य साम्बा-मण्डले अन्ताराष्ट्रियसीमायां अन्त: प्रवेष्टुं बृहत्तम: प्रयास: अपि विफलीकृत: तत्रैव पञ्जाबराज्ये ह्य: रात्रौ पठानकोट-जालन्धर-अमृतसर-भठिण्डा-क्षेत्राणि समेत्य अनेकेषु स्थलेषु पाकिस्तानद्वारा लक्षिता: प्रयासा: भारतीय- शस्त्रबलै: विफलीकृता: ।

## विमानपत्तनपिहितानि

पाकिस्तानदेशेन साम्प्रतिके समये जातम् आक्रमणम् उद्दिश्य भारते किशनगढ़- भुन्तर-लुधियाना-विमानपत्तन-स्थानकानि पिहितानि। इत: पूर्वं राजस्थान- पञ्जाब-जम्मू-कश्मीर-चण्डीगढ़-हिमाचलप्रदेश-राज्यानि समेत्य अनेकेषु विमानपत्तनस्थानकेषु परिचालनं पिहितं जातम्। अत्रावधौ नागरिकोड्डुनमन्त्रालय: समग्रे देशे विमानपत्तनस्थानकानां पिधानसम्बद्धां

सूचनां निरस्तीकृतवान्। तत्रैव: दिल्लीविमानपत्तनस्थात्रेण यात्रासम्बद्धं दिङ्निर्देशं प्रख्यापयता प्रोदीरितं यत् परिचालनं सामान्यमस्ति। वायुक्षेत्रस्य परिवर्तमान-परिस्थितिम् आलक्ष्य काश्चित् उड्डयनसेवा: प्रभाविता: जाता: ।

भारतं-पाकिस्तानश्च

पठानकोटनगरे राजौरीक्षेत्रे वा आतङ्कवादै: कृतस्य आत्मघातिन: आक्रमणस्य सूचना सम्पूर्णतया असत्यम् इति रक्षास्रोताः सूचितवन्त: । अपि च उभय पक्षत: टैंक इति योद्धृ-यानानाम् आवागमनम् नैव जातमिति ।

विदेशमन्त्रालय:

विदेशमन्त्री डा. एस्. जयशङ्करः ह्यः सायंकाले अमेरिकादेशस्य विदेश- मन्तिर्णा मार्कोरुबियो-इत्यनेन सह वार्तालापं कृत्वा, सीमापारस्य आतङ्कवादविषये भारतस्य निर्दिष्टस्य मापनस्य च प्रतिक्रियायाः विषये अवधानं दत्तवान्। सामाजिकसन्देशपटले एकस्मिन् डा. जयशङ्करः अवदत् यत् भारतः उद्विग्नतायाः कस्यापि प्रयासस्य दृढतया प्रतिरोधं करिष्यति इति। सः अवदत् यत् असौ आतङ्कवादस्य विरुद्धयुद्धे भारतेन सह कार्यं कर्तुं अमरीका देशस्य प्रतिबद्धताया: गभीरतया प्रशंसां करोति। विदेश-विदेशमन्त्री, इटली-देशस्य उपप्रधानमन्त्रिणा तथा विदेशमन्त्रिणा एन्टोनियो तजानी इत्यनया सह टेली-कान्फ़रेन्स्-द्वारा आतङ्कवादस्य दृढतया प्रतिकारार्थं भारतस्य निर्देशितप्रतिक्रियायाः उपायानां च विषये अपि चर्चां कृतवान् ।

दिल्ली-अवकाश:

दिल्ली-प्रशासनम् अग्रिमसूचनापर्यन्तं स्वाधिकारिणां कर्मचारिणां च सर्वान् अवकाशान् निराकृतवत्। आधिकारिकादेशेन सूचितं यत् वर्तमान- परिस्थित्याः दृष्ट्या, आपत्कालिकप्रतिक्रिया-व्यवस्थायाः सज्जतायाः सुनिश्चिततायाः आवश्यकतायाः च दृष्ट्या निर्णयः कृतः इति।

।। इति वार्ता:।।